# चतुःश्लोकी

भगवद्यामुनमुनिभिरनुगृहीता

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम्॥

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम्।
स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम्॥

नमो नमो यामुनाय यामुनाय नमो नमः।
नमो नमो यामुनाय यामुनाय नमो नमः॥

कान्तस्ते पुतुषोत्तमः फणिपतिः शय्याऽसनं वाहनं
वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी।
ब्रह्मेशादिसुरव्रजः सदयितः त्वद्दासदासीगणः
श्रीरित्येव च नाम ते भगवति ! ब्रूमः कथं त्वां वयम्॥ १॥

यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभुः
नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः।
तां त्वां दास इति प्रपन्न इति च स्तोष्याम्यहं निर्भयः
लोकैकेश्वरि ! लोकनाथदयिते ! दान्ते दयां ते विदन्॥ २॥

ईषत् त्वत्करुणानिरीक्षणसुधासन्धुक्षणाद्रक्ष्यते
नष्टं प्राक् तदलाभतस्त्रिभुवनं संप्रत्यनन्तोदयम्।
श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते
संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित्॥ ३॥

शान्तानन्तमहाविभूति परमं यद्ब्रह्म रूपं हरेः
मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतम्।
यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि ता -
न्याहुः स्वैरनरूपरूपविभवैर्गाढोपगूढानि ते॥ ४॥

आकार त्रयसंपन्नां अरविन्द निवासिनीम्।
अशेष जगदीशित्रीं वन्दे वरद वल्लभाम्॥

॥ इति भगवद्यामुनमुनिभिरनुगृहीत चतुःश्लोकी॥

**********

| HOME | STOTRA LIST | PREVIOUS ARCHIVE | NEXT ARCHIVE |
|---|---|---|---|

Hosted by tripod